परिभाषा, स्त्री, (परि+भाष्+अच्। ततष्टाप्। परिष्कृतं भाषणम्। पदार्थविवेचकाचार्य्याणां युक्तियुक्ता वाक्। इति काव्यप्रकाशटीकायां चण्डीदासः॥ तत्पर्य्यायः। प्रज्ञप्तिः २ शैली ३ सङ्केतः ४ समयकारः ५। इति त्रिकाण्डशेषः॥ (सूत्रलक्षणविशेषः। सूत्रं षड्विधम्। यथा,—
"संज्ञा च परिभाषा च विधिर्नियम एव च। अतिदेशोऽधिकारश्च षड्विधं सूत्रलक्षणम्॥")
"ग्रन्थस्य संक्षेपनिर्व्वाहार्थसङ्केतविशेषः। यथा चपोदित्येवमादि।" इति मुग्धबोधटीकायां दुर्गादासः॥ यथा माघे। १६। ८०।
"न खलु प्रतिहन्यते कुतश्चित्
परिभाषेव गरीयसी यदाज्ञा॥"
("अव्यक्तानुक्तलेशोक्तसन्दिग्धार्थप्रकाशिकाः। परिभाषाः प्रवक्ष्यन्ते दीपीभूताः सुनिश्चिताः॥"
इति वैद्यकपरिभाषाया लक्षणम्॥
"प्रथमं परिभाषा स्याद्द्वितीयव्याख्यानकन्तथा।"
इति शार्ङ्गधरे पूर्व्वखण्डे प्रथमेऽध्याये॥)
परिभूतं, त्रि, (परिभूयते स्म। परि+भू+क्तः।) अनादृतम्। तत्पर्य्यायः। अवगणितम् २ अवमतम् ३ अवज्ञातम् ४ अवमानितम् ५। इत्यमरः। ३।१।१०६। अभिभूतम् ६। इति जटाधरः॥ अप्रस्तुतम् ७। इति शब्दरत्नावली॥ (यथा, सारावल्यां विंशाध्याये।
"परिभूतं सुखरहितं कुलटापुत्त्रमतिपापरतञ्च। जनयति नक्षत्रपतिः क्षितिसुतदृष्टो भपि शूरम्॥")
परिभ्रमः, पुं, (परि+भ्रम्+अच्।) सर्व्वतोभ्रमणम्। परिपूर्व्वभ्रमधातोर्भावे अल्प्रत्ययनिष्पन्नः॥
परिमण्डलं, त्रि, (परि सर्व्वतो मण्डलम्।) वर्त्तुलम्। इति हेमचन्द्रः॥ (यथा, भागवते।५।२२।१६।
"लक्षोत्तरं सार्द्धनवकोटियोजनपरिमण्डलं भूवलयस्य क्षणेन सगव्यूत्युत्तरं द्विसहस्रयोजनानि स भुङ्क्ते॥" परमाणुपरिमाणम्। परिमाणविशिष्टः परमाणुः। इति वैशेषिकसूत्रविवृतिः॥ शब्दोऽयं न्यग्रोधशब्देन युक्तः अर्थान्तरं प्रकाशयति। पुं, पुरुषविशेषः। तस्य लक्षणं यथा, मात्स्ये ११८ अध्याये।
"न्यग्रोधौ तु स्मृतौ बाहू व्यामो न्यग्रोध उच्यते। व्यामेन उच्छ्रयो यस्य अध ऊर्द्ध्वञ्च देहिनः। समोच्छ्रयपरीणाहो न्यग्रोधपरिमण्डलः॥"
स्त्री, लक्षणान्वितरमणीविशेषः। यथा, शब्दरत्नावल्याम्।
"स्तनौ सुकठिनौ यस्या नितम्बे च विशालता। मध्ये क्षीणा भवेद् या च न्यग्रोधपरिमण्डला॥"
पर्व्वतविशेषः। यथा महाभारते ६।६।११।
"परिमण्डलयोर्मध्ये मेरुः कनकपर्व्वतः। आदित्यतरुणाभासो विधूम इव पावकः॥")
परिमलः, पुं, (परिमलते सुगन्धिपार्थिवकणान् धरतीति। मल ङ धारणे+अच्। "स्थितावेव गन्धः।" इति न्यायादस्य तथात्वम्।) विमर्द्दनम्। कुङ्कुमादिमर्द्दनम्। विमर्द्दोत्थजनमनोहरगन्धः। सुरतादिविमर्द्दोत्थविलेपनकुङ्कुमादिगन्धः। इत्यमरभरतौ॥ सुरभिमाल्यगन्धादिधारणेनोत्पन्नो हृद्यो गन्धः। इति स्वामी॥ (यथा, कलाविलासे। १।५।
"रतिलुलितललितललनाङ्गमलजलवाहिनो सुहृर्यञ्च।
शयकेशकुसुमपरिमलवासितदेहा वहन्त्यनिलाः॥")
तत्पर्य्यायः। आमोदः २ गन्धः ३ सौरभ्यम् ४ सौरभम् ५। इति राजनिर्घण्टः॥ पण्डितसमूहः। इति शब्दरत्नावली॥
परिमाणं, क्ली, परिमीयतेऽनेन। (परि+मा+करणे ल्युट्।) परिमितिव्यवहारासाधारणकारणम्। इति सिद्धान्तमुक्तावली॥ माप इति भाषा। (यथा, मनुः। ८।१३३।
"त्रसरेणवोऽष्टौ विज्ञेया लिक्षैका परिमाणतः॥")
तत्पर्य्यायप्रकारा यथा,—
"यौतवं द्रुवयं पाय्यमिति मानार्थकं त्रयम्। मानं तुलाङ्गुलिप्रस्थैर्गुञ्जाः पञ्चाद्यमाषकः॥ ते षोड़शाक्षः कर्षोऽस्त्री पलं कर्षचतुष्टयम्। सुवर्णविस्तौ हेम्नोऽक्षे कुरुविस्तस्तु तत्पले॥ तुला स्त्रियां पलशतं भारः स्याद्विंशतिस्तुलाः। आचितं दशभाराः स्युः शाकटो भार आचितः॥ कार्षापणः कार्षिकश्च ताम्रिके कार्षिके पणः। अस्त्रियां आढ़कद्रोणौ खारी वाहो निकुञ्चकः॥ कुड़वः प्रस्थ इत्याद्याः परिमाणार्थकाः पृथक्॥"
इत्यमरः। २।९।८५—८९॥ *॥
न्यायमते तद्यथा,—
"परिमाणं भवेन्मानव्यवहारस्य कारणम्। अणु दीर्घं महद्ध्रस्वमिति तद्भेद ईरितः॥ अनित्ये तदनित्यं स्यान्नित्ये नित्यमुदाहृतम्। संख्यातः परिमाणाच्च प्रचयादपि जायते॥ अनित्यं द्व्यणुकादौ तु संख्याजन्यमुदाहृतम्। परिमाणं घटादौ तु परिमाणजमुच्यते॥ प्रचयः शिथिलाख्यो यः संयोगस्तेन जन्यते। परिमाणं तूलकादौ नाशस्त्वाश्रयनाशतः॥"
इति भाषापरिच्छेदे। ११०—११३॥
(परिमाणं निरूपयति। परिमाणमिति। परिमितिव्यवहारासाधारणं कारणं परिमाणमित्यर्थः। तच्चतुर्व्विधं अणु महद्दीर्घं ह्रस्वञ्च इदं चातुर्व्विध्यं प्रत्यक्षसिद्धं तत्राणुत्वह्रस्वत्वे महत्त्वदीर्घत्वे च समनियते तत्परिमाणं नित्यमित्यत्रपरिमाणमित्यनुषज्यते जायते इत्यत्रापि परिमाणमित्यनुवर्त्तते। अनित्यमिति पूर्व्वेणान्वितं तथाचानित्यं परिमाणं संख्याजन्यं परिमाणजन्यं प्रचयजन्यञ्चेत्यर्थः। तत्र संख्याजन्यमुदाहरति द्व्यणुकादाविति। द्व्यणुकस्य त्रसरेणोश्च परिमाणं प्रति परमाणुपरिमाणं द्व्यणुकादिपरिमाणं वा न कारणं परिमाणस्य स्वसमानजातीयोत्कृष्टपरिमाणजनकत्वात् द्व्यणुकादिपरिमाणन्तु परमाणुत्वापेक्षया नोत्कृष्टं त्रसरेणुपरिमाणन्तु न सजातीयं अतः परमाणौ द्वित्वसंख्या द्व्यणुकपरिमाणस्य द्व्यणुके त्रित्वसङ्ख्या च त्रसरेणुपरिमाणस्यासमवायिकारणमित्यर्थः। परिमाणजन्यमुदाहरति परिमाणं घटादाविति परिमाणजं कपालादि परिमाणजन्यम्। प्रचयजन्यमुदाहरन् प्रचयं निर्व्वक्ति प्रचय इति अर्थात् प्रचयस्य नष्टावयविनाशः कथं परिमाणनाशकः असत्यप्यवयविनि त्रिचतुरपरमाणुविश्लेषे तदुपचये चावयविनः प्रत्यभिज्ञानेऽपि परिमाणान्तरस्य प्रत्यक्षसिद्धत्वादिति वाच्यम्। परमाणुविश्लेषे द्व्यणुकस्य नाशोऽवश्यमभ्युपेयस्तन्नाशे च द्व्यणुकनाशः एवं क्रमेण महावयविनो नाशस्यावश्यकत्वात् सति च नाशकेऽनभ्युपगममात्रेण नाशस्य अपवदितुमशक्यत्वात् शरीरादाववयवोपचये असमवायिकारणनाशस्यावश्यकत्वादवयविनाशः आवश्यकः न च पटविनाशेऽपि तन्त्वन्तरसंयोगात् परिमाणाधिक्यं स्यादिति वाच्यं तत्रापि वेमाद्यभिघातेन समवायिकारणतन्तुसंयोगनाशात् पटनाशस्यावश्यकत्वात् किञ्च तन्त्वन्तरस्य तत्पटावयवत्वे पूर्व्वं तत्पट एव न स्यात् तत्तन्तुरूपकारणाभावात् तत्तन्तोरवयवत्वाभावे च न तेन परिमाणाधिक्यं संयुक्तद्रव्यान्तरवत् तस्मात्तत्र तन्त्वन्तरसंयोगे सति पूर्व्वपटनाशस्ततः पटान्तरोत्पत्तिरित्यवश्यं स्वीकार्य्यम्। अवयविनः प्रत्यभिज्ञानन्तु साजात्येन दीपकलिकादिवत् न च पूर्व्वतन्तव एव तन्त्वन्तरसहकारात् पूर्व्वपटे सत्येव पटान्तरमारभ्यमिति वाच्यम् मूर्त्तयोः समानदेशताविरोधात् एकदा नानाद्रव्यस्य तत्रानुपलम्भ बाधितत्वाच्च पूर्व्वद्रव्यस्य प्रतिबन्धकस्य विनाशे द्रव्यान्तरोत्पत्तिरित्यवश्यमभ्युपेयत्वात्॥" इति सिद्धान्तमुक्तावली॥)
परिमार्य्यं, त्रि, (परि+मृज्+ण्यत्। "चजोः कु घिण्ण्यतोः।" ७।३।५२। इति जस्य गः। "मृजेर्वृद्धिः।" ७।२।११४। इति वृद्धिः।) परिमृज्यम्। परिशोधनीयम्॥
परिमार्ज्जनं, क्ली, (परि+मृज्+ल्युट् ततो वृद्धिः।) खाद्यभेदः। मधुमस्तकम्। यथा, शब्दचन्द्रिका।
"मधुतैलघृतैर्मध्ये वेष्टिताः समिताश्च ये। मधुमस्तकमुद्दिष्टं तत्ख्याता परिमार्ज्जनम्॥"
परिशोधनञ्च॥
परिमितं, त्रि, (परि+मा+क्तः। परितो मितं वा।) युक्तम्। इति त्रिकाण्डशेषः॥ परिमाणविशिष्टम्। यथा, उद्भटः।
"द्रविणं परिमितमधिकं
व्ययितं जनमाकुली कुरुते।
क्षीणाञ्चलमिव पीन-
स्तनजघनायाः कुलीनायाः॥"
परिमृज्यं, त्रि, (परि+मृज्+"मृजेर्विभाषा।" ३।१।११३। इति क्यप्।) परिमार्ग्यम्। इति व्याकरणम्॥
परिमेयं, त्रि, (परिमीयते इति। परि+मा+"अचो यत्।" ३।१।९७। इति यत्। "ईद्यति॥" ६।४।६५। इति ईत् ततो गुणः।) परि-